
The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY:-
SHREE. P. H. KARANI
Date 17-10-2008



Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशायनमः अथोत्सर्जनप्रयोगः अथकालनिर्णयः श्रवणेनश्रावणस्यपंचम्यांहस्तेनरा इतिगृह्यपरिशिष्टे
धनिष्ठासंयुतेकुर्याच्छ्रवणेकर्मयद्भवेत् तत्कर्मसफलंज्ञेयंमुपाकरणसंज्ञितं उदयव्यापिनीतेवधिस्त्वेघटिकाद्वयं तत्क
र्मसफलंज्ञेयंतत्पुण्यत्वनंतकं श्रवणाभावेघटिकाद्वयन्यूनेवापंचम्यादौकार्यं अत्रश्रवणोमुख्योनेगौणः इतिकालः
उपाकर्मदिनेप्रातः शुचौदेशेसुस्नातः स्वासीनश्चार्यप्राणानायम्यपुराणोक्त०र्थंपंचगव्यसंस्कारंकरिष्ये सुवर्णादिनाम्र
पात्रंकृत्वा गायत्र्यागृह्यगोमूत्रंगोमयंक्षीरंदधिकाव्याइतिस्पृशं शुक्रमशीतिआज्यंचैवशतावा
कुशोदकं आपोहिष्ठादिभिर्मंत्रैः प्रणवेनचमंथयेत् सर्वेषांआचम्यप्राणानायम्यदेशकालौसंकीर्त्यशु०र्थंकर्माधिकारार्थं
शरीरशुध्यर्थंचपंचगव्यप्राशनंकरिष्ये यत्सगतस्तितंपापंदेहेतिष्ठतिमामके प्राशनात्पंचगव्यस्यदहत्यग्निरिवेंधनं प्रणवे
नपिबेत् आचम्य आचार्यःसम्यप्राणानायम्यदेशकालौसंकीर्त्यशु०र्थंममाध्याप्यानांनाधीतानांछंदआदीनांयानया
मनानिरोधनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंऋग्भिश्छंदोभिःसहउत्सर्जनारव्यंकर्मकरिष्ये तदंगगणपतिपूजनंकरिष्ये
पूजनेअशक्ति० र्थंउत्सर्जनहोमंकर्तुंतद्दिलादिसर्वंकर्मकरिष्ये तद्होमयेनप्रदक्षिणमुपलिप्योल्लिख्य दक्षिणोष्टोदुरीर्ष्याद्
प्रतीच्यौमध्यमिसंगुलाविसृज्य दक्षिणेपाणौमासुरक्तस्रुचः प्रादेशमात्रमेकरेखांलिखित्वातस्यदक्षिणोत्तरयोः प्रागा
यतेपूर्वलेखयाप्रादेशमात्रेद्वेलेखेलिखित्वा तयोर्मध्यपरस्परमसंस्पृशउरुस्रुचः प्रागायताः प्रादेशसंमितास्तिस्रउ
तिपद्लेखायज्ञियशाकलमूलेनदक्षिणहस्तेनोल्लिख्यलेखासुतंशाकलमुदगग्रंनिधायस्रुवंदक्षिणमङ्गुष्ठमूलेनशाकलमादा
यनिःस्यपाणिंप्रक्षाल्यवाग्यतोभवेत् ततस्त्रेजसेनासंभवेमृन्मयेनवापात्रयुग्मेनसंपूरीकृत्यसुवाभिन्याश्रोत्रियागारा
त्स्वगृहाद्वासमृद्धिनिर्धममग्निमादायस्रुवंदक्षिणाग्रेयांनिधाय जुष्टंदमूनाआत्रेयोवसुधोग्निष्विष्टकृत् एष्यंगिराहविर्गणो गो
तमोग्निष्विष्टकृत् अग्न्याधानेविनियोगः ॐजुष्टंदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहविष्मान् विश्वाअग्नेअभियुजो
विहत्याशत्रूयंतामाभराभोजनानि एष्यग्नइहहोतानिषीदास्यः सुपुरएतासभवानः अवतात्वारोदसीविश्वमिन्वेयजामे
हसोमनसायदेवान् इत्यक्षतेरावाह्यआछादनंदुरीक्षत्य समस्तव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती अग्नि

41
1989

प्रतिष्ठापनेविनि० आत्माभिमुखंपाणिभ्यां भूर्भुवैंःस्वरों३ वृषवर्धनानामानमग्निंप्रतिष्ठापयामि ओंक्षत्रंधा०नानि नि
स्त्रिंशेनधमन्याप्रणाभ्यध्यायदंचत्वारिंशंगोतमोवामदेवोग्निस्त्रिष्टुप् अग्निमूर्तिध्यानेविनियोगः ॐचत्वारिंशंगा
त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेशा समहस्त्रश्चतुश्रृंगः सप्तजि
ह्वोद्विशीर्षकः त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः स्वाहांतुदक्षिणेपार्श्वेदेवीवामेस्वधांतथा बिभ्रद्दक्षिणहस्तेनुशा
त्रिमन्नंचचंचुवं नोमरंव्यञ्जनंवामेघृतपात्रंचधारयन् मेषारुढोजराबद्धोगौरवर्णोमहोजसः धूम्रध्वजोलोहिताक्षःसप्ता
र्चिसर्वकामदः आत्माभिमुखमासीन एवंरूपोऽग्नीन्ध्यायेत् अग्नेवैश्वानरशोडिल्यगोत्रमेषध्वज प्राङ्मुखोवरसोभव क्रिय स्वममसं
माणउत्सर्जनहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये अस्मिन्नाहितेग्नौजातवेदसमग्निमिध्मेन प्रजापतिंप्रजापतिंचा
घारदेवतेआज्येनअग्नीषोमौचक्षुषीआज्येन अत्रप्रधानं अथदेवताअनुक्रमार्थंगृह्यपरिशिष्टखंडोक्तं अज्यभागौहुत्वा
ज्याकृतीर्जुहुयात्साविज्यैअत्रत्वेअथायेमेधायैप्रज्ञायैधारणायैसदसस्पतयेछंदोभ्यऋषिभ्यश्चेत्यथदधिसक्तुहो
म्यग्निमीळेपुरोहितमित्यैकाकुंभकर्णस्तदग्रेवीहावदंत्वेशाकुनेभद्रमावदर्णानाजमद्भिनाधामंतेविश्वंभुवनमधिश्रितं
गतानोयज्ञयज्ञियाःसुशमियानःस्वोअरणःप्रतित्वेचित्रेत्यग्नेयाहिमरुत्सकायतेराजन्त्वंहविरितिहृचाःसमानीवआ
कूतिरित्येकांतछंदोरात्रणीमहेदयकाध्येष्यमाणोध्यापयेन्नारब्धएताभ्योदेवताभ्योऽज्या इतिउपाकर्मतंत्रे अत्रकिंकार
णात्लेखनंउभौतेवौदेवतास्तास्यिलेख्यद्रव्यभेदोऽत्वात् साविज्यौ अत्राणंअथोमेधोप्रज्ञोधारणोसदसस्पतिंअनुम
तिंछंदोस्तृचौ एताःप्रधानदेवताःआज्येन अग्नेअत्रणस्यैनान्अग्नेशाकुनेअग्निमित्रावरुणोअग्निअपः अग्निमरुतः
अग्निविश्वेदेवान्अग्नेइडासोमोइदंआद्यामरुतःपवमानसोमेसोमंअग्निसंज्ञानेवाऽऽछलोनोनुविश्वेदेवान् एताःप्रधान
देवताःगृह्यसिद्ध्यर्थंचरुद्रव्येणशेषेणस्विष्टकृतमग्नेरुग्मंसंनहनेनरुद्रंअयासंअग्निदेवान्विष्णुंअग्निवायुसूर्यंप्रजाप
तिंचैताःप्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिबर्हणार्थंनिवारमग्निंमरुतश्चाज्येनअंगदेवताः प्रधानदेवताः सर्वाःसं
निहिताःसंतुएवंसांगोपांगेनकर्मणासद्योयस्पेन्यहतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती अन्वाधानसमिद्धोमेविनियोगः

ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं॰ अग्नाधाय परिसमुह्य परिस्तीर्य पुरस्ता दक्षिणतः पश्चादुत्तरत इत्युदक्संस्तृणन्ति
पर्युक्षणं पवित्रकरणं पात्रासादनं चरुस्थाली प्राक्षण्यो दर्वी स्रुचौ प्रणीता आज्यपात्रेध्मबर्हिः समार्गस्तानू होमद्रव्यं चोसा
दयामि प्रोक्षणीपात्रमुत्तानं कृत्वा तत्रानंतर्गर्भिणि साग्र समस्थूल प्रादेशमात्र कुशाग्रयुक्ते पवित्रे निधाय सुद्राभिरङ्गिरसा
त्रैपूरयित्वा गंधपुष्पादिक्षिप्त्वा हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यामुद्गृह्य प्रथमपवित्रे धृत्वा अपस्त्विति पात्रमाप्लुत्य पात्रान्तरेण
त्वाऽध्यंचविस्रस्य सर्वाणि पात्राणि त्रिप्रोक्षयेत् ताआपः क्वचित्कमंडलौ निक्षिपेदित्येके प्रणीतापात्रमग्नेः प्रसव्य निधा
यतेपवित्रेनिधाय उत्तानाभिरङ्गिरसात्रैपूरयित्वा गंधपुष्पाक्षतांनिक्षिप्य दक्षिणतः ब्रह्मणेऽध्मासनं उत्तरतः अग्नेः प्र
णीतायेऽध्मासनं अथ ब्रह्मणो होत्राचमनयज्ञोपवीतशोधनानि अथशब्दः अधिकारार्थः इदानीं ब्रह्मणोऽपि विधायोविध्यं
नेऽस्यर्थः होमा॰ शानि व्याख्यातानीत्यर्थः स्नानाचमनादिनाशुचिर्भूत्वा ब्रह्मत्वंकरिष्यामि इत्यागत्य तिलाक्षारं प्रविशेत्
प्राङ्मुखआचमनंकुर्यात्कर्मागत्वा यज्ञोपवीतग्रहणेपेतरकर्मानुषोरपिकर्मणो वैचना हते यज्ञोपवीतीसेयस्यारिति
निसः सर्वकर्मणि दक्षिणतो ध्रुवाणां अजतोवा अनः प्राप्तस्य ब्रह्मणो यं नियमउच्यते ध्रुवाणां अजतांचपुरुषाणां या
निकर्माणि तेषां दक्षिणतोनिसोभवेत् ध्रुवाणां अजतां इतिकर्तृविशेषणंनकर्मणां निसत्वंमंत्रोपक्रमभ्रस्तापरिसमाप्ते
दक्षिणतस्सिध्यर्थं वाशब्दः समुच्चयार्थः क्वचित्कर्मणि क्वचिन्नेष्टति क्वचिद्भवति तत्रभूयसांधर्मः परिगृह्यते बहि
र्वेदिर्यां दिशं अजेयुः सेवतत्र प्राची यत्र बहिर्वेदिर्वसतीवरीग्रहणादिकर्तुर्यादिशं अभिमुखाअजंतिऋत्विजः तत्रतामे
वदिशं प्राचीकृत्वा दक्षिणतोभवेत् सेवतत्रेतिवचनाद्बहिः स्तिष्ठतामग्निमुखएवप्राचीभवेत् चेष्टास्वंभासुखानां
सनयोर्विकल्पः अग्नेषुकर्मसुखानमासनंवाभवेत् तिष्ठद्होमाश्चयेवषट्काराः तिष्ठंतोयेहोमावषट्कारारहितास्त्र
तेषुचस्वानमासनंवाभवेत् आसीतान्यत्र अन्यत्रेत्यनंतरसूत्रहृदय विषायरन्यत्रेत्यर्थः समस्थूलपाणंगुष्ठोयेणाहवनीयं
परिसदक्षिणतः कुशेषुपविशेत् समस्थोपाणी अंगुष्ठोचयस्यसोयं समस्थूलपाण्यंगुष्ठः सव्यपाणिना दक्षिणं पाणिलं
प्रदेशं गृह्णीयात् दक्षिणेनसव्यांगुष्ठं एवंकृतेपाणी अंगुष्ठोचसमस्थोभवतः एवंभूतोयेणाहवनीयं परिस्तृतस्यदक्षि
नतः कुशेषुपविशेत् निरसनं कृत्वाकुशग्रहणास्तिसंभवेत् एवासनेप्रकल्प्यतेदक्षिणतइतिपुनर्वचनमाहवनीयस्ये

213
1989

वदक्षिणतोनक्रियमाणस्यकर्मणस्सेवमर्थे ब्रह्मत्वंकर्तुमशक्तस्यब्रह्मसदनआशिष्यतेकृतस्यतेपसंगोपायेत्यिनपेन ब्रह्मं
नपः प्रणेष्यामिनिश्चित्य भूर्भुवःस्वर्बृहस्पतिप्रसूतः इतिजपित्वा ॐप्रणय इत्यतिसृजेत् इत्याश्वलायनसूत्रेणनारायण
सूक्तंब्रह्माधिकारः मुखसमंधृत्वा अग्नेरुत्तरतोदर्भेषुनिधायपवित्रेगृहीत्वाभ्यंदर्भैराछादयेत् तेपवित्रेअज्यपा
त्रेनिधायतत्साज्यंपुरतःसंस्थाप्यतस्मिन्नाज्यमास्मिन्नाग्नेरुत्तरतस्तिलानागराभस्मनासहाग्नेरुत्तरपरिस्तरणाद्बहिर्नि
ष्क्रमेत्तेनाज्यमधिस्रुत्यस्रुवतादर्भेस्रुवंनाज्यात्यंगुष्ठपर्वमात्रं प्रक्षालितदर्भाग्रद्वयमाज्येप्रक्षिप्यपुनर्ज्वलतातेनैव
दग्धेनचरुणासहाज्यं त्रिःपर्युक्षेत्स्रुवंनिरस्याऽपउपस्पृश्यागायत्रीप्रत्रक्षाऽयोयस्पृश्यतु मुखमेवाज्यं सविनु
ष्टुप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोस्सूर्यस्यरश्मिभिः इतिप्रागुत्पुनातिसकृन्मंत्रेणद्विस्त्रीवाकृत्वाहुतमाज्यहोमेषुपरिस्तरणंतथाज्यभागौपा
वयत्रेषुअस्त्वाचेतिगृह्यपरिक्षेपेउक्तं अनुष्ठानक्रमसंपादनार्थंतेऽग्नेइदंस्पष्टार्थेअग्निनृतिः ७, स्कंदायस्वाहा
स्कंदायेदंनमम आत्मनोयतोभूमिप्रोक्षन्तत्रबहिः संनहनोरज्जुमुद्गरोग्रासार्यंतस्यबहिः प्रागग्रमुद्गरवर्गम
विरलमास्तीर्यतस्मिन्नाज्यपात्रंनिधायस्रुवादिसंमार्जयेत् दक्षिणहस्तेनस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्दर्भान्गृ
यसहैवाग्रौप्रताप्यस्रुचंनिधायस्रुवस्यबिलमग्रेस्तृष्टमस्यात्ममयतः आरभ्यदृष्टोयावदुपरिष्टाद्बिलंभवेत्
नेदंस्रुचिसंसृज्यसंमार्गदर्भानग्नौप्रहरेत् ततःसिक्थचरुमयाबधिश्रियाभिधायौदगुद्वास्याज्याज्ययोर्मध्येनौ
त्वाऽज्यादक्षिणतोबर्हिषिसांतरमासाद्यपुनरभिघार्यनाभिघार्यवा विश्वानिनइतिस्तृणामात्रेयोवसुश्रुतोग्नि

त्रिष्टुप् द्वाभ्यामर्चनेऽंगानमस्कारणे विनियोगः एकादशांगुलिमिति देशेगंधाक्षतपुष्पैरग्निंसमग्नमर्चयेत् ॐ
विश्वानिनोदुर्गहाजातवेदः ॐसिंधुंननावादुरितातिपर्षि ॐअग्नेअत्रिवन्नमसागृणानः ॐअस्माकंबोध्यविताततन्नो
ॐयस्लाहरांकरिणामन्यमानः ॐअमर्त्तंमर्त्योजाहवीमि ॐजातवेदोयशोअस्मासुधेहि ॐप्रजाभिरग्नेअमृतत्वमश्यां
ॐयस्मेत्वंसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिनंशतस्वंति आत्मानंचात्मं
सहस्रंप्रशस्त्यधमंधेनरस्तुमिधमस्तानेनिधायपाणिधमाधायमूलमध्याग्रेषुस्रुवेणाग्निरमिधार्य मूलमध्ययो र्म
ध्यभागेगृहीत्वा अथैनेवामदेवोजातवेदाअग्निस्त्रिष्टुप् इध्माहवनेविनियोगः ॐअयंतइध्मआत्माजातवेदस्तेनेध्य
स्वर्धस्वचेध्यर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहा जातवेदसेत्र्यायुषंदर्शनमम तनःस्रुवेणा
ज्यमादायाग्नेरायतनस्यदायव्यकोणमारभ्याग्नेयकोणपर्यंतं प्रजापतयनमसास्मरन्स्वाहेत्यूर्ध्वाज्यधारामग्ना
विध्मरूपरिकृत्वापुनराज्यमादायनैरृत्यकोणतःईशानीपर्यंतंनयेत्कृत्वा प्रजापतयइदंनममेसुभौत्यागो स्रुवेणा
ज्यमादायाग्नेरुत्तरतनपार्श्वेपूर्वभागेऽग्नयेस्वाहेतिहुत्वाऽथयइदंनममेतित्यागःपुनराज्यमग्नेरुत्तरेणपार्श्वेनसम
प्रदेशेसोमायस्वाहेतिहुत्वा सोमायेदं० अथप्रधानहोमःस्रुवेणाज्येनुहोतिअध्येष्यमाणोध्याप्येरन्वारभ्यः सावित्र्यै
स्वाहासावित्र्याइदं० अनुमतयेस्वाहा अनुमतयइ०अथायेस्वा०अथायाइ०मेधायेमेधायाइ०प्रज्ञायेप्रज्ञायाइ०धारणा
यैधारणायाइ०सरस्वत्यैसरस्वतयेअनुमतयेअनुमतयइ०छंदोभ्यऋषिभ्यस्वा०छंदोभ्यऋषिभ्यइ०पंचा
वत्यैनोनुनिष्टन्यार्थं प्रसृतोमसमंकरंचरावपित्वोमंचेमं प्रथमःस्फरिरुन्मृजे सुनेसातेनयज्ञगमंवोऽतिविश्वामित्र
जमदग्नीदमे उपविश्य अथचरुणाघृतेनधर्मः स्रुवेणदर्व्यासुपल्वीर्यद्विरवदायदर्व्योप्यपात्रंछंदोहविरभिघार्यद्
वाःस्रुवेनैवाभिघार्यविधूमज्वालायोनुहोतिपंचावत्यैतुत्रिरवदायेति अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमंस्वाहा अग्नयइदं०
२ ॐकुलुंपकुलंपोदृणसूर्यामनुष्टुप् उत्सर्ज० ॐकुलुंपकुलंपत्रीहिरः प्रवर्तमानकः शुक्रिकुस्यारसंघि

HS
1989

घियमरंसंशुक्रिकुलेघिषंस्वाहा अस्मणसूर्यायाइदं० २ त्वमग्नेशोनकोगृत्समदेऽग्निर्जगतीउत्सर्जन० त्वमग्नेद्युभिस्त्वमाशु
शुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि स्त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिस्वाहा अग्नयइदंनमम
अयदग्नेसुमतेशोकेतोजगतीउत्सर्ज० ॐआयदेस्त्वंशाकुनेभद्रमायदृक्षोमासीनःसुमतिंचिकिद्धिनः यदुसतंन्व
दसिकंकरियथायदहंतेमविरथंसुदीराःस्वा० शाकुनायेदं० सोमस्यमागोधिनोघिक्रमिन्द्रोग्निस्त्रिष्टुप् उत्सर्जन०ॐ
सोमस्यमात्वंसंवत्स्यग्नेवत्सेचकर्थविदथेयजध्यै दर्वाऽअलाद्रीद्यंजेअद्रिसायेअग्नेनयेजुषस्वस्वा० अग्नयइ०
गृणानाभागंवोजमदग्निर्मित्रावरुणौगायत्री उत्सर्जन०ॐगृणानोजमदग्निनायोनाऽऋतस्यसीदतंपातंसोममृतायं
धास्वा० मित्रावरुभ्यामिदंन० ॐत्वांग्नेगोतमोवामदेवोग्निरुष्णिक् उत्सर्जन० त्वांग्नेसप्तिमन्यवोदधासोदेवमर
तिन्यरिरंतिकृत्वान्येरिरे अमर्त्यंयजतमर्त्येष्वाराद्यमादेवंयजनंनप्रचेतसंविश्वमादेवंयजनंनप्रचेतसंस्वा० अग्नयइ०।
धामंतेगोतमोवामदेवआपोजगती उत्सर्जन० ॐधामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृदयंदिवंपतिमापोमनो
कंसमिद्धेयआऽऋतस्तमश्यामधुमंतंतऊर्मिस्वा० अग्नयइ० अबोध्यग्निरजनोबुधगविष्ठिरायग्निस्त्रिष्टुप् उत्सर्जनप्र
धान० ॐअबोध्यग्निःसमिधाजनानांप्रतिधेनुमियायतीमुषासं यह्वाइवप्रयवामुज्जिहानाःप्रभानवःसिस्रतेनाक
मछस्वा० अग्नयइ० प्रतिचक्ष्वमेत्रावरुणीवसिष्ठेद्रासोमावनुष्टुप् उत्सर्जन० गोतानआग्नेयएवयामरुद्भिरुतेनिज
गतीउत्सर्ज० ॐगोतानोयज्ञंयजियाःसुजिह्मियोनाहवुमरस्यएवयामरुत्स्वेदासोनपर्वतासोव्यानशेयज्ञस्यप्रचेतसः
स्यातुर्धर्तरोविदःस्वा० मरुद्भ्यइदं० त्वंग्नेबाहुभ्यांधृतिरित्यग्निस्त्रिष्टुप् उत्सर्ज० ॐत्वंग्नेप्रथमोमनोतास्याधि
योअभवोदक्षसहोतावंसीरोदसीवरुणोदुरोरितुसहोविश्वस्मैसहसेसहध्यैस्वा० अग्नयइदं० योनःस्वःपायुर्भरद्वाजो
विश्वेदेवानुष्टुप् उत्सर्ज० ॐ योनःस्वोअरणोग्नेसोजिघांसति देवासस्तंसर्वेधुर्यंनुग्रंसहध्यैममोनरंस्वा० विश्वेभ्यो
देवेभ्यइदं०अग्निंनरोमरुतावरुणीवसिष्ठेग्निर्विराडुत्सर्जन०ॐअग्निंनरोदीधितिभिररणोहस्तयुर्नेजनयतप्रशस्त
दूरेदृशंगृहपतिमथर्युस्वा० अग्नयइदंन० प्रतिचक्ष्वचित्रमेत्रावरुणीवसिष्ठेंद्रासोमावनुष्टुप् उत्सर्जन०ॐप्रतिचक्ष्व

विश्वेदेवेभ्यस्सोमजाग्नेत्वं रक्षोभ्योवधमस्यन्मशानिपातुमह्यंस्वा० इंद्रासोमाभ्यामिदं० माचिक्काण्डः प्रगाथइंद्रोवृहन्नी उत्सर्जनप्र०॥ माचिदन्यद्विशंसतसखायोमारिषण्यत इद्वमिन्नोनाद्वषणंसचासुनेमुक्रुधाचनश्शंसतस्वा० इंद्रायेदं० आग्नेयाहिसोमपिराग्निमारुतमनुष्टुप् उत्सर्जन०॥ अग्नेयाहिमरुत्सखारुद्रेभिःसोमपीतये सोभूर्योउपसुष्टुतिमावयस्वत्वेरिस्वा० अग्निमरुद्भइदं० स्वादिष्ठयाविश्वामित्रोमधुच्छंदाः पवमानसोमोगायत्री उत्सर्जन०॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया इंद्रायपातवेसुतःस्वा० पवमानसोमायेदं० यतेराजन्भारीचःकृष्णपृषःपवमानसोमःपंक्तिः उत्सर्जनप्र०॥ यतेराजन्त्सुतंहविस्तेनसोमाभिरक्षनः अरातीयामानस्तारीन्मोचनःकिंचनाममर्दिराये हेपरिस्रवस्वा० पवमानसोमायेदं इदंतुपवमानपदः प्रयमानसंज्ञकमेत्रः तस्मात्कारणात् पवमानसुहवग्रहणं कार्यं अग्नेवृहंनाम्यक्तिरोग्निस्त्रिष्टुप् उत्सर्जन०॥ अग्नेवृहंनुषसामूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्योतिषागात् अग्निर्भानुनाऋशतास्वंगाजातोविभ्वासद्मान्यप्राःस्वा० अग्नयइदं० समानीवःसंवननःसंज्ञानमनुष्टुप् उत्सर्जन०॥ समानीवआकूतिःसमानाहृदयानिवः समानमस्तुवोमनोयथावःसुसहासतिस्वा० संज्ञानायेदं० अथवा कृकानोतुविश्वेभ्योदेवेभ्यः तन्मेत्रः तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदेवीस्वस्तिरस्तुनः स्वस्तिमानुषेभ्यः ऊर्ध्वंजिगातुभेषजंशंनोअस्तुद्विपदेशंचतुष्पदेस्वा० विश्वेभ्योदेवेभ्य इदं० त्विष्टकृद्यजानधर्मः स्रुवेणद्यौर्मुपस्तीर्यहविरुत्तरार्धेपृथिव्यांचीनाभिरेवांगुलिभिःसंकृद्यद्रायपाअग्नेनाभिधार्यातनूंतूर्भिर्यावोऽआवाशानदेशेजुह्वान् पंचावत्तीनस्तूतराधोस्तूर्यार्धेद्विरवद्रायेति जामदग्न्यावस्तुविद्याष्टिषेणास्तथैवच भार्गवच्यवनाऔर्वाःपंचावत्तीनश्रिताः यद्यस्मिंहिरण्यगर्भोग्निस्त्विष्टकृद्हुतोस्सर्वंत्विष्टंसुकृतंकरोतुमे अग्नयस्त्विष्टकृतेसुकृतकृतेसर्वप्रायश्चित्तकृतेनोकामान्समर्धयित्रेसर्वान्नःकामान्समर्धयस्वाहेसेकश्रुस्योर्ध्व अग्नयेत्विष्टकृतइदं० ननोमेरुनरलःस्तनमिध्मबंधनरज्जुर्विस्रस्याद्रिःप्रोक्षण्यादाद्यधात्तिरुद्रायपशुपतयेस्वा० रुद्रायपशुपतयइदं० स्रुक्षेवा अपःसृष्ट्वा अथाधेयमाणोग्न्याधेयःसहकेशादिप्राणाया

मंत्रंकृत्वा ॐभूरोंभुवःस्वःॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् इतिमंत्रेणाज्यंसमुप स्पृश्य उपस्तीर्णेदर्भगर्भेस्रुत्वाजंस्रिदक्षिणजानोनिधायप्रणवादिस्वयमुच्चारयेत् वाचयेत् प्रणवस्यपरब्रह्मऋषिः परमात्मादेवतागायत्रीछंदः व्याहृतीनांब्रह्मदग्निर्भरद्वाजभृगवऋषयः अग्निर्वायुःसूर्यो ब्रह्मापतयोदेवता देवीगायत्री देवीउष्णिक्देवीबृहत्यौछंदांसि गायत्र्याविश्वामित्रःसवितागायत्री अग्निमीळेइत्यादीनांछंदसांवैश्वामित्रोमधुच्छंदाऋषयः अग्न्यादयोदेवता गायत्र्यादीनिछंदांसि सर्वेषामुत्सर्जनेवि०॥ व्याहृतीपूर्वंकंप्लोर्ध्वंचशः सक्रुत्सक्रुज्जप्त्वा ॐभूर्भुवःस्वःॐतत्सवितुर्वरेण्यंॐभर्गोदेवस्यधीमहिॐधियोयोनःप्रचोदयात् इतित्रिः ३ ॐअग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं होतारंरत्नधातमं अग्निःपूर्वेभिर्ऋषिभिरीड्योनूतनैरुत सदेवांएहवक्षति अग्निनारयिमश्नवत्पोषमेवदिवेदिवे यशसंवीरवत्तमं अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि सइद्देवेषुगच्छति अग्निहोताकविक्रतुःसत्यश्चित्रश्रवस्तमः देवोदेवेभिरागमत् २ यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि तवेत्तत्सत्यमंगिरः उपत्वाग्नेदिवेदिवे दोषावस्तर्धियावयं नमोभरंतएमसि राजंतमध्वराणांगोपामृतस्यदीदिविं वर्धमानंस्वेदमे सनःपितेवसूनवेग्नेसूपायनोभव सचस्वानःस्वस्तये ३ यायवायाहिदर्शत इमेसोमाअरंकृताः तेषांपाहिश्रुधीहवं इंद्रेतोर्जस्वा अग्नआयाहिवीतये शृणोदेवांरभिष्टये अग्निर्देवानामवमोविष्णुःपरमः अथमहाव्रतं एषपंथाश्रुतकर्मः अथातःसंहितायाउपनिषत् विरामघनक्रिया महाव्रतस्यपंचविंशतिसंख्याभिधेयः अथेतस्यसमाम्नायस्य मयरसनजभनलगसंमितं पंचसंवत्सरमयं गोःमाः समाम्नायःसमाम्नातः अथशिक्षांव्रवीम्यक्षरसंज्ञेच योगीश्वरंयाज्ञवल्क्यं नारायणंनमस्कृत्य अथातोधर्मव्याख्यास्यामः अथातोधर्मजिज्ञा

सा अथातो ब्रह्मजिज्ञासा नक्षेयोगाद्गणीमहेगांतुर्यज्ञायगातुर्यज्ञपतयेदेवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्ध्वंजिगातुभेष
जं शंनोअस्तुद्विपदेशंचतुष्पदे॰ नमोब्रह्मणेब्रह्मणेनमोअग्नयेनमःपृथिव्यैनमओषधीभ्यः नमोवाचेनमोवाचस्प
तयेनमोविष्णवेमहतेकरोमिइतिब्रि॰ शांतिः शांतिः शांतिः सर्वेउत्सृष्टावेवराः इत्यन्ता पूर्वधनवेदसंज्ञकऋग्भूमौ॰
त्यक्ता ब्रह्मणेहस्तेरत्नाद्या दृष्टिरसिरक्षेमेपाप्मानंमृत्योस्त्वमुपगामिनिजलेस्पृष्ट्वा आचार्याः प्रायश्चित्तादि होम
शेषंसमाप्य तत्रमंत्राः अयाश्चेतिविमरोयाळग्निः पंक्तिः प्रायश्चित्तान्यहामेविनियोगः॰ अयाश्चाग्नेस्यनभिशस्तीश्चसत्य
मित्त्वमयासि अयासायंयसाकृतोयासन्त्यंहिषेयानोधेहिभेषजंस्वाहाअयासंयय इ॰ अतादेवामेधातिथिर्गाय
त्री प्रायश्चित्ता॰ अंअतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे पृथिव्याःसप्तधामभिः स्वा॰ इदंविष्णुर्मेधातिथिविष्णुर्गाय
त्री प्रायश्चित्तान्य॰ अं इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं समूळ्हमस्यपांसुरेस्वा॰ विष्णवइदं॰ व्यस्तसप्तव्याहृतीनां
विश्वामित्रजमदग्निभरद्वाजभगवत्कृषयः अग्निर्वायुःसूर्योप्रजापतयोदेवता गायत्र्युष्णिगनुष्टुप्बृहत्यश्छंदांसि प्राय
श्चित्ता॰ अंभूःस्वा॰ अग्नयइदं॰ अंभुवःस्वा॰ वायवइदंनमम॰ अंस्वःस्वा॰ सूर्यायेदं॰ अंभूर्भुवःस्वःस्वाहा प्रजापतयइदं॰
अनाज्ञातमितिमंत्रद्वयस्यहिरण्यगर्भोग्निरनुष्टुप् ज्ञानाज्ञानदोषनिबर्हणार्थेप्रा॰ अनाज्ञातेयदाज्ञानेयज्ञस्यक्रियते
मिथु अग्नेतदस्यकल्पयत्वं हिवेत्थयथायद्स्वा॰ अग्नयइदं॰ पुरुषसंमितोयज्ञोयज्ञः पुरुषसंमितः अग्नेतदस्यकल्प
यत्वं हिवेत्थयथातथद्स्वा॰ अग्नयइदं॰ यसाकृत्नेसास्यश्चितोग्निष्टुप्नूनातिरिक्तदोषपरिहरार्थेप्रायश्चि
त्ता॰ अं यसाकृत्नामनसादीनदक्षानयज्ञस्यमन्वतेमनसि अग्निष्टोताक्रतुविद्विजानन्यजिष्ठोदेवाद्ऋतुशोयु
जानिस्वा॰ अग्नयइदं॰ यद्वोदेवाअतिपापयाविद्वांसश्चिष्टुप् मंत्रनंत्रकर्मविपर्यासाद्विजनिन्दप्रत्यवायपरिहारार्थप्रा
यश्चि॰ अं यद्वोदेवाअतिपापयाविद्वांसश्चिष्टुप्यद्वहंतनं अरायोअस्मॉअभिदुरुनायतेन्यत्रास्मन्मरुतस्तंनि
धेयतनस्वा॰ मरुभ्यइदं॰ अस्मिन्कर्मणिस्वाहाकारकालेअवदानंप्रक्षेपाद्विजनिन्दपरिहरार्थंयथाशिष्टयुक्त्याप्रा
यश्चितः कृत्वा सांगतासंसिध्यर्थंसर्वंप्रायश्चितंकरिष्ये॰ अं भूर्भुवःस्वः स्वा॰ प्रजापतयइ॰ बर्हिषिपूर्णपात्रंनिनयेत्

पूर्णमसिपूर्णंमेभूयाःसुपूर्णमसिसुपूर्णंमेभूयाःसरसिसन्मेभूयाःसर्वमसिसर्वंमेभूयाअक्षितिरसिमामेक्षेष्ठाः इ
त्यभिमृश्य अर्धेनोपूर्णपात्रात्प्रतिदिशिसुरुक्मुरुक्षेणउक्षेणोक्षयति प्राच्यांदिशिदेवाऋत्विजोमार्जयंतां दक्षिणा
स्यांदिशिमासाःपितरोमार्जयंतां पितृज्ञास्तुअपस्पृष्ट्वा प्रतीच्यांदिशिग्रहाःपशवोमार्जयंतां उदीच्यांदिशिपयॅ॰ यथ
र्वनस्पतयोमार्जयंतां उर्ध्वायांदिशियज्ञःसंवत्सरः प्रजापतिर्मार्जयतां मार्जयतामितिवा अथस्वशिरसिकुशाग्रेर
पःसिंचयेत् अपोअस्मान्मातरःशुंधयंतुघृतेननो
यतन्व॰पुनंतु विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापुनतमि इरमापःसिंधुरूपअपोनुष्टुप् मार्जनेविनि॰ अं इ
रमापःप्रवहतयात्कंचदुरितंमयि यद्वाहमभिदुद्रोहयद्वाशेषउतानृतं सुमित्र्यानआपओषधयःसंतु अथनिर्ऋतिदेशे
कुशाग्रेरपःसिंचन् उर्मिर्मालस्मेसंतुयोस्मॉइदंयेचवयंद्विष्मस्तंहन्मि स्वाममपाणिउत्तानबर्हिषिनिधायरक्षिणपा
णिनात्मनंप्रसव्यमुखंविपिश्य॰ माहंप्रजांपरासिचंयानःसयावरीरुत समुद्रोनिनयानिसंपाथोअधीथ नाभा
पःसमुद्रंगछतीतिज्ञात्वागंगादिपुण्यनदीस्मरन् पाणिस्थजलं अध्येष्यमाणोध्याय्यःसहोत्मानंप्रोक्षेत् ततःकर्तायं
र्यायज्ञउपनिष्टनेअग्नेत्वंनइतिचतसृणांगोपायनालोपायनावाबंधुसुबंधुःश्रुतबंधुर्विप्रबंधुश्चैकऋचोऋषयः
अग्निर्देवतात्रिपदाविराड्गंरः अभ्युपलब्धेविनियोगः॰ अग्नेत्वंनोअंतमउतत्राताशिवोभवावरूथ्यः वसुरग्निर्वसुश्रवा
॰अच्छानक्षिद्युमत्तमंरयिंदाःसनोबोधिश्रुधीहवमरुष्याणोअद्ययानःसमस्मात् तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीम
हसक्षिभ्यः॰ चमेस्वरश्चमेयज्ञोपचनेनमश्च यतेऽनेनस्मेनउपयतनिरिक्तंस्मेनमः ततोपविश्य अग्नयेनमःस्वाहे
श्रद्धोमित्यादि॰ स्वस्तिश्रीर्मेधोमेयशः प्रज्ञोविद्यांबुद्धिंश्रियंबलंआयुष्यंतेजेआरोग्यंदेहिमेहमयाहनः इत्यादिस्तुतिं
कृत्वं ततःकर्तोआचारात् मानस्तोकेतिकुसोरुद्रोजगतीविभूतियहणेविनियोगः॰ मानस्तोकेतनयेमानआयोमा
नोगोषुमानेअश्वेषुरीरिषः वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे इतिस्रुवेणविभूतिंगृही
त्वा त्र्यायुषंजमदग्नेरितिललाटे कश्यपस्यत्र्यायुषमितिकूर्चे अगस्त्यस्यत्र्यायुषमितिनाभौ यद्देवानांत्र्यायुषमितिद

क्षिणस्कंदे तन्मेअसुञ्जायुषुमिनिधामस्कंधे सर्वमस्तुशतायुषमितिशिरसि इतिभस्मधारयेत् केचनोपरुद्राक्षान्सर्वे
विभूतिधारणंमाङ्गः ननःपेलरणासुनरेविस्त्रेत् अग्नेपरिसमुह्यपरिषिच्य विश्वानिनइतिप्राणङ्गवर्चोधित्वा
अग्नेःवायव्यास्त्रेः अनुलेपनादिमंत्रेपुष्पाञ्जलिंकृत्वा अग्निस्तुविश्रवस्तमंतुविप्रंक्षाणमुत्तमं अनूर्तेआययसत्वि
पुत्रेररातिराशुषे अग्निर्ईशानिसस्तनिंसासाह्योयुधानभिः अग्निरंसरघुष्यदंनेतारमपराजितं इतिमंत्रमयपुष्पं
समर्प्ययथाशक्त्याधानादिकृत्वा प्रमादात्कुर्वतोकर्मप्र० यस्यस्मृत्याचनामोक्त्या० अनेनोसर्जनहोमेनश्रीयज्ञभोक्ता
यज्ञनारायणः प्रीयतां नमम ऊनस्यद्रुत्यर्थेणमस्कृत्य सर्वान्पुरकृतीरंगृत्वा शुक्लस्तिपुरा० थेंउत्सर्जनांगस्नेनगण
स्नानंकरिष्ये स्नात्वाचम्य सुमुखश्चेत्यादि० थेंउत्सर्जनांगंशरीरशुध्यर्थंचभस्मगोमयमृत्तिकास्नानानिकरिष्ये अरो
भस्मस्नानंकृत्वा भस्ममादाय ईशानायनमइतिशिरसि तत्पुरुषायनमःमुखे अघोरायनमःहृदये वामदेवायनमः
गुह्ये सद्योजातायनमःपादयोः अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्म व्योमेतिभस्म सर्वं
ह वाइदंभस्म मानस्तोकेतनयेमानआयोमानोगोषुमानोअश्वेषुरीरिषः वीरान्मानोरुद्रभामितोवधीर्हविष्मंतः स
दमित्वाहवामहे प्रणवेनचसर्वांगेविलिप्य स्नात्वाऽचम्य अथगोमयस्थानं वीक्षितंगोमयमादायसव्यपाणौकृत्वा
इतिमिश्रियाविभज्य दक्षिणभागंप्रणवेनदिक्षुविक्षिप्य उत्तरभागेतीर्थेक्षिप्त्वा मध्यमभागेमानस्तोकइत्यभिमंत्र्य
गंधद्वारां० अयमग्नेश्चरतिनोषधीनांचनेवने तासांऋषभपत्नीनांपवित्रेकायशोधने तन्मेरोगाश्चशोकाश्चनुद
गोमयसर्वदा इतिमंत्रेणशिरः प्रभृत्यंगानिविलिप्य स्नात्वाऽचम्य ततोमृत्तिकास्नानं बलिस्थापर्वतानांत्विद्रेभ
र्विपृथिवि प्रयाभूमिप्रवत्वतिमन्हाजिनीषिमहिनीतिभूमिप्रार्थ्य मावोदिष्टत्वनिनायत्मेचाहंत्वनामिवः द्विषऋ
तुष्यदस्माकंसर्वमस्तनातुरमिति स्वनित्वा स्योनापृथिवीभवानृक्षरानिवेशनी यच्छानः शर्मसप्रथः इतिमृत्तिका
मादाय अयनेतेपरायणेदूर्वारोहंतुपुष्पिणीः हराश्चपुंडरीकाणिसमुद्रस्यगृहाइमे इतिदूर्वामादायमृत्तिकांगायत्र
त्राभोक्ष्य भूमौमृदंनिधायकुशोदकेनमृदंअभ्युक्ष्यनोमृदंदिक्षुक्षिपेत् ॐभ्रातारमिंद्रमवितारमिंद्रंहवेहवेसुह
वंशूरमिंद्रं हयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः इतिपूर्वतः यमायमधुमन्मंराजेहव्येजुहोतन इदं

तिस्रउर्वा मृदश्चशिरसिनिधाय मृत्तिकास्नानंप्रक्षाल्यतीर्थंप्रार्थयेत् हिरण्यश्रृंगंवरुणंप्रपद्येतीर्थंमे धेहियाचतः यु
न्मयाभुक्तमसाधूनांयेभ्यश्चपरिग्रहः यन्ममनसावाचाकर्मणावाऽकृतंकृतं तन्नइंद्रोवरुणोबृहस्पतिः सवि
ताचपुनंतुपुनः पुनः नमोग्नयेक्षुमतेनमइंद्रायनमोवरुणायनमोवारुण्येनमोऽग्नेः यदपाक्रंयदमेध्यंयदशांतंन
दुष्टालुतात् असाधानादतीपानाद्यश्चउपारात्यतियहात् तंनोवरुणोराजापाणिनाहस्तमर्शतु सोहमापोवि
रजोनिर्मुक्तोमुक्तकिल्बिषः नाकस्यपृष्ठमारुह्यगच्छेब्रह्मसलोकतां यश्चाप्सुवरुणःसंपुनातघमर्षणः इममं
इतिद्वाभ्यांसिंधुक्षितप्राणोसीतिगंगायमुनासरस्वतीजगती जलप्रार्थनेविनियोगः ॐ इममेगंगेयमुनसरस्वतिशु
तुद्रिस्तोमंसचतापरुष्ण्याअसिक्न्यामरुद्वृधेवितस्तयार्जीकेशृण्ह्यासुषोमया त्वामाकंसिंधुकलिंगमद्रसुसोमा
त्रोदुतावपर्दिवमुस्पतंति एवंनंवोऽविमृजेतिधीरालेजनासोअमृतत्वमजंते अवश्यंप्राणानायम्य विष्णवेनम
स्त्रिवारं तिथिर्विष्णुस्तथावारोनक्षत्रंविष्णुरेवच योगश्चकरणंचैवसर्वंविष्णुमयंजगत् अद्येत्यादिपूर्वोच्चरित व
र्तमान एवंगुणविशेषणविशिष्टायांपुण्यतिथौममआत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंउत्सर्जनांगत्वेन
प्रार्थनामंत्रस्नानमार्जनंदेवऋषिपितृतर्पणंचकरिष्ये अपतेहेळइति द्वयोर्जीवगर्तिः शुनःशेपः सकृच्छ्रमोवैश्वा
मित्रोदेवरातऋषिः वरुणोदेवता त्रिष्टुप्छंदः वरुणप्रार्थनेविनियोगः ॐअपतेहेळोवरुणनमोभिरवयज्ञेभि
रवयज्ञेभिरीमहेहविर्भिः सयंस्त्वमसुरप्रचेतोराजन्नेनांसिशिश्रथः कृतानि उत्तमंवरुणपाशमस्मदवाधमं
विमध्यमंश्रथायअथावयमादित्यव्रतेतवानागसोअदितयेस्याम प्रपद्येवरुणंदेवमंभसांयोनिमूर्जितं याचि
तोहविषेतीर्थंसर्वपापात्प्रमुच्यते तीर्थमावाहयिष्यामिसर्वांश्चभुविदिक्षुते सांविध्यमत्रिलोकस्थंस्त्रीयतांम
दनुग्रहात् इतिवरुणप्रार्थना तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम भैरवायनमस्तुभ्यंमनुजांस्तुमहोसि सागर
स्तनुविश्वासोदंडहस्तोसुरांतक जगत्संहारकजगन्मारीनमामस्तोसुरेश्वरात् इतिमंत्रंसमुच्चार्यतीर्थस्नानंसमाचरे
त अथान्यतमुत्तम्यार्धतीर्थंगृहीत्वाभूमौ शरीरंजलेरभ्येत्याघ्रायस्तेकरेवले भेषजंजानुचीतोयंचेद्योनाभा

यतोहविः पुष्करादीनितीर्थानिगंगाद्यासरितास्तथा आगंतुपवित्राणिस्नानकालेसमापदेत् नंदिनीन
लिनीसीतामालनीचपलाशगा विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी भागीरथीभोगवतीजाह्नवीत्रिद
शेश्वरी क्षेत्रपालंसंप्रार्थ्य याःप्रवतोनिवतउदन्वतीरुदकाश्चयाः अस्मभ्यंपयसापिन्वमाना शिवादेवी
रमिषमाभवंतुसर्वानोअस्मिन्नाभवंतु जलोदरायंप्रविश्य गंगागंगेतियोब्रूयाद्योजनानांशतैरपि मुच्यतेस
र्वपापेभ्योविष्णुलोकंसगच्छति इतिपौराणिश्च ततःप्रवाहाभिमुखंस्थित्वामार्जनंहृत्वा द्विराचम्य आपोहिष्ठेतितृ
चस्यांबरीषःसिंधुद्वीपऋषिःआपोदेवता गायत्रीछंदः मार्जनेविनियोगः ॐआपोहिष्ठामयोभुव इतित्रिऋ
क् समुद्रज्येष्ठा इतिचतसृणांचसिंधुद्वीपऋषिराआपस्त्रिष्टुप्उत्सर्जनांगत्वेनमार्जनेविनियोगः ॐसमुद्रज्येष्ठाःसलि
लस्यमध्यात्पुनानायंत्यनिविशमानाः इंद्रायाबज्रिन्वृषभोरराणाआपोहिष्ठामयोभुवः ताआपोदिव्याउतवास्र
वंतिखनित्रिमाउतवायाःस्वयंजाःसमुद्रार्थायाःशुचयःपावकास्ताआपो॰ यासांराजावरुणोयातिमध्येसत्या
नृतेअवपश्यंजनानां मधुश्चुतःशुचयोयाःपावकास्ताआ॰ यासुराजावरुणोयातिमध्येसुसोमोयाविश्वेदेवाया
सूर्जेमदंतिवैश्वानरोयाग्निःप्रविष्टस्ताआ॰ एतोन्विंद्रंस्तवामशुद्धंशुद्धेनसाम्ना शुद्धैरुक्थैर्वावृध्यांशुद्धआशीर्वान्ममतु इदंशुद्धोनआगहि
शुद्धःशुद्धाभिरूतिभिः शुद्धोरयिंनिधारयशुद्धोममद्रिसोम्यः इंदशुद्धोहिनेरयिंशुद्धोरत्नानिदाशुषे शुद्धो
रत्नाणिजिघ्नसेशुद्धोवाजंसिषाससि तरत्समंदी॰ इतिचनसृणांकश्यपोवत्सासोमपवमानोगायत्रीउत्सर्जनो
गत्वेनमार्जनेविनि॰ ॐतरत्समंदीधावतिधारासुतस्यौधसः तरत्समंदीधावति उताविदेवसन्मर्तस्यदेव्यवसः
तरत्समंदी॰ ध्यस्यधीरासहस्राणिचदग्हे तरत्स॰ आयोर्ह्यिंगातेनासहस्राणिचदग्हे तरत्स॰
ॐत्रिभिष्टंदेवसवितर्वर्षिष्ठैसोमधामभिः अग्नेरथ्रैःपुनीहिनः पुनंतुमादेवजनाः पुनंतुवसवोधिया विश्वेदेवाः
पुनीतमाजातवेदःपुनीहिमा प्रयायस्वप्रस्थंस्वसोमविश्वेभिरंशुभिः देवेभ्यउतमंहविः उपप्रियंपनिप्नतंयु
वानमाहुतीवृधं अगन्महिष्ठतोनमः अलाय्यस्यपरशुनाशातमापवस्वदेवसोम आखंचिद्देवदेवसोम यः

पावमानीर्योअध्येत्यृषिभिः संभृतंरसं सर्वसम्पन्नमन्नाद्यंतस्मिन्मानरिश्वना पावमानीर्योअध्येत्यृषिभि
संभृतंरसं तस्मिन्सरस्वतीदृहेक्षीरंसर्पिर्मधूदकं इममग्नेतिद्वाभ्यांमेधुक्षि प्रामेधोगंगायमुनासरस्वतीज
गती जलावगाहनविधिनियोगः ॐ इममेगंगेयमुनेसरस्व० शितासि० ऋतंचेतिऋचस्यमधुछंदसोऽघमर्षणऋषि
र्भाववृत्तोदेवताऽनुष्टुप्छंदः उत्सर्जनोगत्वेनजलाद्यघमर्षणेवि० ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ततोरा
त्र्यजायततनः समुद्रोअर्णवः समुद्रादर्णवादधिसंवत्सरोअजायत अहोरात्राणि विदधद्विश्वस्यमिषतोवशी
सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः ततःप्रवाहमनुसंत्रिभिःस्नात्वा
मार्जयित्वा स्नानांगतर्पणंकृत्वा ब्रह्मादयोयेदेवास्तानहंतर्पयामि ब्रह्मेत्यं० ब्रह्मदेवा० स्वर्देवास्त० भूर्भुवस्व
र्देवास्तु० कृष्णद्वैपायनादयोयेऋषयः उपवीतिनःकृत्वा तानृषीन्त० मुनयोस्तभुवऋषि० स्वर्ऋषीस्त० भूर्भुवः
स्वर्ऋषी० प्राचीनावीतिसोमःपितृमान्यमोऽग्निरस्वात्तबर्हिषोतान्कव्यवाहनादयोयेपितरः तान्पितॄंस्त०
भूःपितॄंस्त० भुवःपितॄंस्त० स्वःपितॄंस्त० भूर्भुवःस्वःपितॄंस्त० अग्निरग्निष्वात्तौजोवायव्यरथाः कुलंमम भूमौदत्त
नतायेनतृप्तायांतुपशवोगतिंजलोऽनलंतीर्थतटेनिक्षिप्याःजीवत्सिनरानकार्यं यन्मयाद्यपितृनेनायंशरीरमल
भवं तद्दोषपरिहारार्थं यस्माद्येनतर्पणेन स्त्रीनवस्त्रस्यजलमयंभवतिनदृश्यंविस्रस्यअन्य
दृश्यंविधायतीर्थतटस्थेऽर्घपात्रेऽर्घविधिं आचम्यप्राणायाम्य द्वादशांगुलप्रमाणंसमग्रंदर्भमादायगृहीत्वाऽग्रतश्चतुरंगुलं
विहायमध्येएकांगुलप्रमाणं ग्रंथिंकृत्वा तत्रैकेनवस्त्रेणवस्त्रोपरिलंबेनत्रयोः पीठंकृत्वा तदुपरिस्थाप्य
सुमुखश्चेत्यादि० धं समरुणपापक्षयपूर्वकं अरुंधतीसहितकश्यपादिसप्तऋषिप्रीत्यर्थं उत्सर्जनांगत्वेनचऋषिं
पूजनमहंकरिष्ये पूर्वोक्तप्रकारेणऋषीनावाह्य कश्यपायनमः कश्यपंआवाहयामि आत्रेय०आत्रेआ० भरद्वाजा
य० भरद्वाजंआ० विश्वामित्राय० विश्वामि० गोतमाय० गोत० जमदग्नेय० जमदग्निं० वसिष्ठाय० वसि० अरुंधत्यै
न० अरुंधतीं० तरस्विमित्रावरुणावत्यृशोरश्मभ्यमिदमस्तुश्रोतं अशीमहिगाधमुतप्रतिष्ठांनोहवंतेसा
रथाय गृहावैप्रतिष्ठास्तंकृत्वतिष्ठिनतमयावाचाशंस्तेनस्वाध्यपिदूरइवपशंसेभवेगृहानेवेनान

ज्ञगमिषतिग्रहाहियस्तोप्रतिष्ठाप्रतिष्ठासुप्रतिष्ठितमस्तु ॐ देवाएतस्यामवदंतपूर्वेसप्तऋषयस्तपसेयेनिषे
दुः भीमाजायाब्राह्मणस्योपनीताउर्वीदधातिपरमेव्योमन् इतिमंत्रेणनाममंत्रेणवाध्यानादिषोडशोपचारैःपूज
येत् अर्चनांतेमंत्रपुष्पंसमर्प्य ॐ ऋषेमंत्रकृतोस्तोमैःकश्यपोऽर्धयन्गिरे सामंनमस्यराजानंयोजज्ञेवीरुधांप
तिरिंद्रायेंदोपरिस्रव ॐ अत्रिर्यद्मवरोहन्वीसमजोहवीनोधमानेवयोषा श्येनस्यचिज्जवसान्ननेनाग
छतमश्विनाशंतमेन ॐ एवानस्यूथःसमजासमत्सिंद्रारंधिमथतीरदेवीः विद्यामवस्तोरवसागृणंतोभरद्वा
जाउतनइंद्रदूतं ॐ प्रस्तोभसमकरंचरावपिस्तोमंचमेप्रथमःसुरिरुक्षे सुतेसातेनयद्यागमंवोप्रतिविश्वो
मित्रजमग्नीरमे ॐ अभित्यागोतमागिराजानवेदोविचर्षणे इन्द्रंरभिप्रणोनुमः ॐ गृणानाजमदग्निनायोनाद्य
तस्यसोरतं पातंसोममृताद्यथा ॐ उतास्मिंत्रावरुणोवसिष्ठोवर्ष्याब्रह्मन्मनसोधिजातः द्रप्संस्कंनंब्रह्मणा
दैव्येनविश्वेदेवाःपुष्करेत्वादद॑त ॐ अत्रेर्यथानुसूयास्याद्हविष्टस्याप्यरुंधती कौशीकस्ययथासती तथात्वम
पिभर्तरी एभिर्मंत्रैःकश्यपादिऋषिभ्यःमंत्रपुष्पांजलिंदत्वा अथप्रार्थना समर्षयःशुभासेवाःसर्वेषांवशुभप्र
दाः सर्वेषांपंच्यपोहंतुज्ञानतोज्ञानतःकृतं मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर यत्पूजितंमयादेवपरिपूर्णंत
दस्तुमे अद्याहनेन० अन्यथा० इतिप्रार्थ्य ततःसावित्र्यादीस्तर्पयेत् सावित्रीतर्पयामि श्रद्धांप्रद्धां० मेधां०
प्रज्ञां० धारणां० सदसस्पतिं० अनुमतिं० छंदांस्यृषीन्त० अग्निंत० अन्नपतेत्यृचांत० अग्निं० शाकुनंत० अग्नित०
मित्रावरुणोत्यृचौ अग्निं० अपस्त० अग्निं० मरुतस्त० अग्निं० विश्वान्देवां० अग्निंत० इडासोमोत्यृचौ इडंत० अ
ग्नेरुतस्त० पवमानसोमंत० अग्निं० संज्ञानंत० याज्ञवल्क्यानांतु विश्वान्देवांस्त० अथब्रह्मयज्ञांगमुक्तंयत्तर्पणंस्या
दिहापितत् तीर्थदेवतास्तर्पयति प्रजापतिस्तृप्यतु ब्रह्मात्त० वेदास्तृप्यंतु देवास्तृप्यंतु ऋषयस्तृप्यंतु सर्वाणिछंदांसि
तृप्यं० ॐकारस्त० चषट्कारस्त० आहुतयस्त० सावित्रीतृप्य० यज्ञास्तृप्यं० द्यावापृथिवीतृप्येतां अंतरिक्षंतृप्य
ताहोरात्राणितृप्यं० संध्यास्तृप्यं० सिद्धास्त० समुद्रास्तृप्य० नद्यस्त० गिरयस्त० क्षेत्रौषधिवनस्पतिगंधर्वाप्स
रसस्त० नागास्त० वयांसितृप्यं० गावस्त० साध्यास्त० विप्रास्त० यक्षास्त० रक्षांसितृप्यं० भूतानितृप्यंतु एवमंता

नित्यंतु अथऋषयः उपवीतिनस्तृप्यं० माध्यमा० गृत्समं० विश्वामि० वामदे० अत्रि० भरद्वाज० वशिष्ठ० प्रगाथा० पावमान्यस्तृ० क्षुद्रसू० महासू० प्राचीनावीति सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु जानंतिविवाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृ० गर्गवाचक्नवीस्तृ० वडवाप्रातीथेईस्तृ० सुलभामैत्रेयी० कहोलंतृ० कौषीतकंतृ० महाकौषीतकंतृ० पैंग्यंतृ० महापैंग्यंतृ० सुयज्ञंतृ० सांख्यायनंतृ० ऐतरेयंतृ० महैतरेयंतृ० शाकलंतृ० बाष्कलंतृ० सुजातवक्त्रंतृ० औदवाहितंतृ० महौदवाहितंतृ० सौजामितंतृ० शौनकंतृ० आश्वलायनंतृ० येचान्येआचार्यास्तेसर्वेतृप्यंतु० स्वप्रति स्वप्रतिपुरुषंपित्रस्तर्पयित्वा अस्मत्पितरंअमुकशर्माणंअमुकगोत्रंवसुरूपंस्वधानमस्तृ० पितामहंअमुकशर्माणंअमुकगोत्रंरुद्ररूपंस्वधानमस्तृ० प्रपितामहंअमुकशर्माणंअमुकगोत्रंआदित्यरूपंस्वधानमस्तृ० अत्रमातरंअमुकीं अमुकगोत्रांवसुरूपांस्वधा० पितामहींअमुकीं अमुकगोत्रांरुद्ररूपां० प्रपितामहींअमुकीं अमुकगोत्रांआदित्यरूपां० सापत्नमातरंअमुकीं अमुकगोत्रांवसुरूपांस्वधा० मातामहंअमुकशर्माणंअमुकगोत्रंवसुरूपंस्व० मातुःपितामहंअमुकशर्माणंअमुकगोत्रंरुद्ररूपं० मातुःप्रपितामहंअमुकशर्माणंअमुकगोत्रंआदित्यरूपंस्व० मातामहींअमुकीं अमुकगोत्रांवसुरूपांस्व० मातुःपितामहींअमुकशर्माणंअमुकगोत्रंरुद्ररूपंस्व० मातुःप्रपितामहींअमुकीं अमुकगोत्रांआदित्यरूपांस्व० पत्नींअमुकीं अमुकगोत्रांवसुरूपांस्व० पित्र्यंअमुकशर्माणंअमुकगोत्रंसपत्नीकंससूतंवसुरूपंस्व० मातुलंअमुकशर्माणंअमुकगोत्रंसपत्नीकंससूतंवसुरूपं० भ्रातरंअमुकशर्माणंअमुकगोत्रंसपत्नीकंससूतंवसुरूपं० पितृभगिनींअमुकीं अमुकगोत्रांसभर्तृकांससूतांवसुरूपां० अस्मत्मातृभगिनींअमुकीं अमुकगोत्रांसभर्तृकांससूतांवसु० आत्मभगिनींअमुकीं अमुकगोत्रांसभर्तृकांससूतांवसुरू० श्वशुरंअमुकशर्माणंअमुकगोत्रंसपत्नीकंससूतंवसुरूपं० गुरुंअमुकशर्माणंअमुकगोत्रंवसुरूपंस्व० आर्तंअमुकशर्माणंअमुकगोत्रंसपत्नीकंससूतंवसुरूपंस्व० आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवः तृप्यंतुपितरःसर्वेमातामहादयः अनीतकुलकोटीनांसप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं ये केचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः तेगृह्णंतुमयादत्तंवस्त्रनिष्पीड्यतोदकं अनेनदेवर्षिपितृतर्पणेनजनार्द

नवासुदेवः प्रीयतां अथयमतर्पणं सव्येनापसव्येनवाकार्यं यमंतर्पयामि धर्मराजंतृ० मृत्युंतृ० अंतकंतृ० वैवस्वतंतृ० कालेनर्प० सर्वभूतक्षयकरंतृ० औदुंबरंतृ० नीलंतृ० परमेष्ठिनंतृ० वृकोदरंतृ० चित्रंतृ० चित्रगुप्तंतृ इतियमतर्पणं ततः यमायनिहताःपितरोयमराजोवैवस्वतोदंडधरश्चकालः भूताधिपोदध्नजानुसारीरुतोनमंतृ इशाभिर्जपंति इतिदशावारंजपेत् अग्याअग्नेत्यादिदशर्चोनिपदेतू अग्याअग्नेरथवसेहोत्रायविष्टभारतीवरूत्रीधिषणांवहधीवासंपरिमानरिहंनहतुविग्नेभिःस्वस्तिभिर्यातिविघ्नथः वयोधसइनेरेरिहत्सहस्रानुरूपेनासचनेवतनीरिह अयंयज्ञोदेवयाअयंमियेधइमाब्रह्मण्ययमिंद्रसोमः स्तीर्णबर्हिरानुशक्रप्रयाहिपिबानिषद्यविमुञ्चाहरीइह अनीयामनिदस्तिरस्वस्तिभिर्हित्वावद्यमरातीः दृष्ट्वीशोयोरापउस्रिभेषजंस्याममरुतःसुहअग्नेरक्षणोअंहसः प्रतिष्पदेयरीयतः तपिष्ठैरजरोदह अग्नेभवसुषमिधासमिध्यउनबर्हिरुर्विया विस्तृणानोउनद्वारउशतीर्विश्वयेतामुनदर्षोऽउशतआवहेह अयोमुरीययदियातुधानोअस्मियदिवायुस्तनपपुरुषस्यअधासचीरर्दशभिर्विसूयायोमामोघयातुधानित्याह अध्वर्यवायावंसोमामिंद्रःपिपासतिउपनूनंयुयुजेवृषणाहरीआचनगामरञ्जसेऽग्निरिदंपुरोधेहव्यवाहमुपब्रुवे देवाऽआसादयादिहअग्नेबाधस्वविमृधोविदुर्गहापामीवामपरासिसेधअस्मात्समुद्राऽहृतोदिवोनोपभरानुपनःसृजेह ११ अकारादिहकारांतंस्मानकालेसरापदेतू अत्रहत्यासहस्राणिभ्रूणहत्याशतानिच उपपातककोटीनांअत्रहत्यादिनिर्दहेतू सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् ततःशांतयेशांतिमंत्रंजपेत् आनोभद्राइतिद्वौवर्गौ ॐशंनइंद्राग्नीभवतामवोभिःशंनइंद्रावरुणारातहव्याशमिंद्रासासाम्विनोयशोभिःशंनइंद्रापूषणावाजसातौशंनोभगःशमुनःशंसोअस्तुशंनःपुरंधिःशमुसंतुरायःशंनसत्यस्यसुयमस्यशंसःशंनोअर्यमापुरुजातोअस्तुशंनोधातारमुर्वीनोअस्तुशंनउरुष्याभवतुस्वधाभिःशंरोदसीबृहतीशंनोअद्रिःशंनोदेवानांसुहवानिसंतुशंनोअग्निर्ज्योतिरनीकोअस्तुशंनोमित्रावरुणावशिनाशंशंनःसुकृतांनिसंतुशंनइषिरोअभियातुवातःशंनोद्यावापृथिवीपूयमु

नो द्यावापृथिवी उरुगायेनो अस्तु शोनऽओषधीर्वनिनो भवन्तु शोनो रजसस्पतिरस्तु जिष्णुः १ शोनऽइन्द्रो वसुभिरेनो अ
स्तु शमादित्येभिर्वरुणः सुशंसः शोनो रुद्रो रुद्रेभिर्जलाषः शोनस्त्वष्टाग्नाभिरिहश्रृणोतु शोनसोमो भवतु ब्रह्म
शोनः शोनो याचाणः शमुसन्तुयज्ञाः शोनः स्वरुणामितयो भवन्तु शोनः प्रस्व१शम्वस्तुवेदिः शोन सर्वऽ
रुचक्षाउदेतु शोनश्चतस्रः प्रदिशो भवन्तु शोनः पर्वता ध्रुवयो भवन्तु शोन सिंधवः शमुसन्तापः शोनोअदितिः
भवतु व्रतेभिः शोनो भवन्तुमरुतः स्वर्काः शोनो विष्णुः शमुपूषानोअस्तु शोनो भवित्रं शम्वस्तुवायुः शोनो देवः
सविता त्रायमाणः शोनो भवन्तूषसो विभातीः शोनः पर्जन्यो भवतु प्रजाभ्यः शोनः क्षेत्रस्यपतिरस्तु शंभुः २
शोनोरेवा विश्वदेवा भवन्तु शोसरस्वतीसहधीभिरस्तु शमभिषाचः शमुरातिषाचः शोनो दिव्याः पार्थिवाः
शोनोअप्याः शोनः ससस्यपतयो भवन्तु शोनोअजैनः शमुसन्तुगावः शोनऋभवः सुकृतः सुहस्ताः शोनोभ
वन्तुपितरो हवेषु शोनोअजएकपाद्देवोअस्तुशोनोहिबुध्न्यः शंसमुद्रः शोनोअपांनपात्पेरुरस्तुशोनः पृथि
भवतुदेवगोपा आदित्यासःशरवोजुषन्तेरुद्रासश्चित्रतमाणेनवीयः श्रृण्वन्तुनोदिव्याः पार्थिवासोगोजाता
उतयेयतियासः येदेवानांयज्ञियायज्ञियानांमनोर्यजत्रा अमृताऋतज्ञाः तेनोरासन्तामुरुगायमद्य यूयं
पातस्वस्तिभिःसदानः ३ समृषद्वाजिनमित्येकोवर्गः इतिपदम् ततःसुरक्षार्थेपर्जन्यस्तूष्णीं निजपेत् अथो
यदत्रवसमितिविवर्गः ४ तिस्राआचः प्रवदन्त्योतिरत्राएतदुहैमधुरोघमूधः सघत्सेऊधंगर्भोओषधी
नांसोमोजातोवृषभोवनानांत्वष्टेदमुग्रोवीर्यायकर्तोरवर्धनओषधीनांयोअपांयोविश्वस्यजगतोदेवईशे सन्निधानुशरणंश
मंयंसन्निवर्तुज्योतिरस्मिन्त्स्मे स्तरीरुत्वद्वतिसत्रतरत्यथाबशेतन्चेचक्रुषेपितुःपयःप्रतिगृभ्णा
तिमातातेनपिबर्धतेनेनपुत्रः यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्त्रेधासस्रुरापः त्रयःकोशासउ
पसेचनासोमध्वश्चोतसन्तिदेवाविरप्शं इन्द्रवायुःपर्जन्यायस्पतीराजेन्द्रोअस्मेतरंत्सुजातंधत् मयोभुवोरक्षयः १०
संत्वस्मेसुपिप्युषीओषधीर्देवगोपाः सरेतोधारुषभःशश्वतीनांतस्मिन्नात्माजगतस्तस्थुषश्च तन्मक्र
ऊतंपातुशतशारदायूयंपातस्वस्तिभिःसदानः १ पर्जन्यायप्रगायतदिवस्पुत्रायमीळुषे सनोयवस्व

59
1984

मिछतु योगर्भमोषधीर्गवोऋणोस्पर्वतो पर्जन्यःपुरुधीणो तस्यारास्मेहविर्जुहातामधुमतमं इन्द्रोनः
संयतंकरत् २ संवत्सरंशशयानाब्राह्मणाव्रतचारिणः वाचंपर्जन्यजिन्वितांप्रमंडूकाअवादिषुः दिव्याआ
पोअभियदेनमायंस्तिनंशुष्कंसरश्शयानं गवामहनमायुर्वर्धमानोनोमंडूकानोवधुरश्रुसमेति यदीम
न्नुउदानोअभ्यवर्षीत्यथाचतः प्रावृष्यागतायां अस्यत्वक्साक्षिपतंनपुत्रोअन्योअस्यमुपवदतेमति अन्यो
अन्यमनुगृभ्णात्येनोरूपंप्रसर्गेयदमंदिषातां मंडूकोयदभिवर्षः कनिक्रदश्चिःसंधंकेहरितेनवाचं यदेषा
मन्योअन्यस्यवाचंशाक्त्येवचरतिजिघ्नमाणः सर्वेनदेषांसमथेपर्वयसुवाचोवदथनाध्यक्षु ३ गोमायु
रेकोअजमायुरेकःपृश्निरेकोहरितएकएषां समानंनामबिभ्रतोविरूपाःपुरुत्राचरंतिपिशंगंदंतः ब्राह्मणा
सोअतिरात्रेनसोमेसरानपूर्णमभितोवदंतः संवत्सरस्यतदहःपरिष्ठयन्मंडूकाःप्रावृषीणंबभूवथ ब्राह्मणा
सःसोमिनोवाचमक्रतेब्रह्मकृण्वतःपरिवत्सरीणं अध्वर्यवोधर्मिणःसिष्विदानाअविर्भवंतिगुह्यानकेचित् दे
वहितिंनुपुरांदशस्यकृतुनरोनप्रमिनंतिधीराः संवत्सरेप्रावृष्यागतायांतपोव्रतायमनाअश्नुवंतेविसर्गं गोमायुर
ादजमायुरादस्श्निरदाथरितोनोयवसंगवांमंडूकादतः शतानिसप्तसावे प्रतिरंतआयुः ४ प्रदेव
ब्राह्मणोवर्गः बृहस्पतिप्रथमंजायमानोमहोज्योतिषःपरमेव्योमन् इतिसूक्तानि अथब्राह्मणोऽरण्यं ऋषयोवैसत्रमासतते
ऋषयमैत्रेयसामदेनयंहाग्याःपुत्राः किंनोब्राह्मणःकथंवामध्येदीक्षितंतुहिथोवदंतेनमेनंपिपासा
हंतुसरस्वत्यास्तटेकामापागछतमापोवृत्रायसत्रसरस्वतीसमंतंपर्यधावत्साध्यंतर्हिपरिसारकमित्याचक्ष
तेयदेनंसरस्वतीसमंतपरिससारतेवाऋषयोवृत्रघ्निदुर्धाइमंहवाउपेमऋषयोमृडाइतिनथेतिनमुपाऽयंत
नमुपऽयेतरपोनाथायमकुर्वतप्रदेवब्राह्मणोगानुरस्तितेनापोग्रियंधामोपागछतुपदेवानामुपायोग्रि
यंधामृगछतुपदेवानोजयतिपरमेलोकंयएवंवेदयश्चैवंविद्वानेतदपोनाथंकुरुतेतसंततमनुब्रूयात्संत
नवार्थेइन्द्रज्येष्ठाभ्यःपर्जन्यस्यानस्मानसंततमयाचत्यंतस्यग्निः प्रथमोसंततमन्वाहतेनेवतसमेसंततमनूक

भवति १ ११ २ अथारण्यकः अथातोरेतसः सृष्टिः प्रजापतेरेतोदेवारेतोवर्षंवर्षस्थरेत ओषधयओषधीनारेतोनमनस्परेतोरेतसोरेतः प्रजाः प्रजानारेतोहृदयंहृदयस्परेतोमनोमनसोरेतोवाचोरेतः कर्मनरिरं कर्मरूपमयंपुरुषोब्रह्मणोलोकः सरसमयोयंस्त्रीसमयस्तस्माच्छिरण्मयोहिरण्मयोहवाअमुष्मिंल्लोकेसंभव तिहिरण्मयः सर्वेभ्योभूतेभ्योदरशोयएवंवेद १ ततःऋषीनुद्वासयेत् विश्वतानेसवनेषुप्रवाच्यायाचकर्थम घवंनिंद्सुन्वते पारावतंयत्पुरुसंभरतंवस्यावृणोःशारभायऋषिबंधवे इत्युद्वासयेत् ततःउत्सर्जनंगत्वैनय थाशास्त्रंयथाकालेनब्राह्मणान्भोजयेत् शुश्रोरकेतनंयादिवापीकूपतडागेषुएतत्सर्वंकार्यं ततोग्निविसर्ज नंगच्छगच्छऋत्रेश्वरस्थानेपरमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छेतिशानः इत्युत्सर्जनंप्रयोगःसंपूर्णः अ थनूतनब्रह्मचारिणाविशेषः यद्यूते गुरुभार्गवयोर्मौंजैतबोवाक्यत्ववार्थके तथाधिमासेसंक्रांतोयहणेवृद्धि श्राद्धेयः प्रथमोरुतिर्नस्यात्तत्कर्मविनश्यति उपाकर्मतथात्सर्गेप्रसवाहोत्सवाष्टकाः मासश्राद्धोपरेकार्यो च जयित्वातुपेत्रिकं उत्तरेमासिकार्योइत्यर्थः अस्यब्रह्मचारिणोवेदग्रहणाधिकारसिद्धिद्वाराश्रीपरमे०र्थंउ पाकर्मोत्सर्जनंकर्मकरिष्ये तदंगगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये मातृकापूजनंनां दीश्राद्धंचकृताकृतं उपाकर्ममात्रंकृत्वा अनुचार्यः प्राणानायम्यदेशकालौसंकीर्यममअध्यापिनोच्चअध्ये ष्यमाणब्रह्मनांछंदआदीनांयातयामत्वपरिहारेणाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंऋषिब्राह्मणैःसहउपाकर्मोत्सर्ज नंकरिष्ये तदंगस्नंदिलादिसर्वमुत्सर्जनंवत्कृत्वानद्यभ्येयदिकिंचिद्विघ्नोशेत्तिनदिमात्रलिखेन अग्निस्थाप नेबलवर्धननामानमग्निंप्रतिष्ठापयामि क्रियमाणेउपाकर्मणिहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये अस्मिन्नाहितेग्न्याधाज्यभागांतेमुक्तोऽग्रथानं सावित्री० अग्ने अदृणसूर्यावित्यादि २० एताःप्रधा नदेवतादधिसक्तुश्वेतेनशोषणस्विष्टकृतमग्निमिथ्मसंनहनेनरुद्रयज्ञोपवीतेपरमात्मानंअथासामग्निमि त्यादिचक्षुषीहोमांतेकृत्वा अत्रप्रधानंअथेष्यमाणोध्याप्यैरन्वारब्धः सावित्यादिनवाज्याकृतीर्हुत्वा पंचा

११

61
1989

वतानु ब्रूहतोभस्मित्युपस्थाय अथअवहानंत्रिर्वारंअवहानधर्मेणकृत्वा अग्निमीळेपुरुछंदाग्निर्गायत्री उपाकर्मप्रधानदधिसक्तुहोमेविनियोगः ॐ अग्निमीळे० अग्नयइ० इत्यादिसंज्ञानपर्यंतंकृत्वा स्विष्टकृतं कृत्वा स्रुचिग्रहस्य दधिसक्तुन्यास्यचुल्लामात्रप्रमाणंतुदधिसक्तुंचगृह्यते प्राशनादृतेपात्रंश्रुतिस्मृतिमुच्य ते वेदारंभणतःपूर्वंसक्तुप्राशनतःपरं नवयज्ञोपवीतानिकृत्वादत्वाचधारयेत् दधिक्राव्णइतिमंत्रस्यगोतमोवा मदेवोदधिक्रावानुष्टुप् दधिसक्तुप्राशनेविनियोगः ॐदधिक्राव्णो अकारिषंजिष्णोरश्वस्यवाजिनः सुरभिनोमुखा करत्प्रणआयूंषितारिषत्स्वाहा देवोवस्सवितोत्पुनात्विति प्राशम्य द्विराचम्य परिस्तरणदर्भाणेअथस्तोनिहतांजलौअन्येना पः सेचनंतन्मार्जनंसंप्रक्षणंइतिअनेनप्रकारेणमार्जनंकृत्वा यज्ञोपवीतमितिमंत्रस्यपरब्रह्मपरमात्माऋषिष्टु प् यज्ञोपवीतहोमेविनियोगः ॐयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यं प्रतिमुंचशुभ्रंयज्ञो पवीतंबलमस्तेजस्वाहा परमात्मनइदंनमम इतिकृत्वादत्वाचधारयेत् अथनूतनब्रह्मचारिणायज्ञोपवीतधार णोकटिसूत्रंबध्वा कोपीपरिधाय्यवस्त्रमेखलादंडाजिनानिचधारयेत् अत्रेषुश्चोउपविश्य प्राणानायम्यतिथ्यादि संकीर्त्यऋष्यादिस्मरणांतेसर्वेषामुपाकरणविनियोगः व्याहृतिपूर्वंकंपश्चोर्धर्चशः सकृत्गायत्रीवाचयित्वा अ ग्निमीळइत्यादीनांसर्वेषांप्रागग्रत्वंदत्वा सर्वेषांउपाकृतावेदान् इत्यंकृत्वा ततःअंजलिस्थकुशाग्रदक्षिणकर्णेनि वेदपाःपस्पृश्य अथाचार्यः प्रायश्चितादिहोमशेषंसमाप्य ततःवेदप्रीत्यर्थंयथाशक्त्याब्राह्मणान्भोजयिष्ये तथा दक्षिणांप्रदानंकरिष्ये आचार्यपूजनंकृत्वा आचार्योयंगोप्रतिनिधिनिष्क्रयद्रव्यंदत्वा कर्मेश्वरार्पणंकृत्वा अथयज्ञो पवीतसंस्कारोलिख्यते तिथ्यादिसंकीर्त्यश्रुति० धर्मशास्त्रानुकूलानुष्ठानसिध्यर्थंयज्ञोपवीतसंस्कारंकरिष्ये ॐभो पात्रांतरेपलाशपर्णेवायज्ञोपवीतेकुशाग्रैः प्रोक्ष्य ॐभूर्भुवःस्वः तत्सवितुर्वरेण्यं० आपोहिष्ठा० ऋकु हिरण्यवर्णाः शुचयः पावका० यासांराजा० यासांदेवा० शिवेनमा० निधत्त पावमानःसुवर्जनः पवित्रेणविचर्षणिः यःपोनासपुनातुमा पुनंतुमादेवजनाः पुनंतुमनसोधिया पुनंतुविश्वआयवः जातवेदःपवित्रवत् पवित्रेणपु

नाहिमा सुक्रेणदेवीद्यन् अग्नेकृत्याकृत्ए॒रसु यनेपवित्रमर्चिषि अग्नविततमंतरा अस्मतेनपुनीमहे उभाभ्यांदे
वसवितःपवित्रेणसवेनच इदंब्रह्मपुनीमहे वैष्णवीपुनतीदेव्यागात् यस्येक्षीस्तुवोबीतपृष्ठाः तयामदंतः
सधमाद्येषु वयए॒स्यामपतयोरयीणां वैश्वानरोरश्मिभिर्वायुनालु वातःप्राणेनेषिरोमयोभूः द्यावापृथिवीपयसा
पयोभिः ऋतावरीयज्ञियेमापुनीतां बृहद्भिःसवितःस्तुभिः वर्षिष्ठैर्देवमन्वभिः अग्नेरस्तुनीहिमा येनदेवाअपु
नता॥ येनार्षादिमंकऋाः तेनदिव्येनब्रह्मणा इदंब्रह्मपुनीमहे यःपावमानीरध्येति ऋषिभिःसंभृतए॒रसं स
र्वए॒सपूतमश्नाति स्वदितंमातुरिश्वना पावमानीर्योअध्येति ऋषिभिःसंभृतए॒रसं तस्मेसरस्वतीदुहे क्षीरए॒
सर्पिमधुदकं पावमानीस्वस्त्ययनीः सुदुघाहिपयस्वती ऋषिभिःसंभृतोरसः ब्राह्मणेष्वमृतए॒हितं पावमानी
र्दिशंतुनः इमंलोकमथोअमुं कामान्समर्धयंतुनः देवीर्देवैःसमाभृता पावमानीःस्वस्ययनीः सुदुघाहिघृत
श्चुतः ऋषिभिःसंभृतोरसः ब्राह्मणेष्वमृतए॒हितं येनदेवाःपवित्रेण आत्मानंपुनतेसदा तेनसहस्रधारेण
पावमान्यःपुनंतुमा प्राजापत्यंपवित्रं शताधारंहिरण्मयं तेनब्रह्मविदोवयं प्रतंब्रह्मपुनीमहे इंद्रस्तुनीतिसह
मापुनातु सोमस्वस्तयाबरुणःसमीच्या यमोराजाप्रमृणाभिःपुनातुमा जातवेदोमोर्जयत्यापुनातु ततःयज्ञो
पवीतमादाय नूयतेसुसेत् ॐकारश्चाग्निनागाश्चसोमश्चिन्प्रजापतिः वायुस्त्वौविश्वेदेवाएकेनवनंतवः
ॐकारंप्रथमतोन्यसामि अग्नेतनूपानेनवानिन्यसेत् भूरग्निंचपृथिवींचमोच भीए॒श्वलोकौसबस्सर्चप्रजा
पतिस्त्वासादयतु तयादेवतयांगिरस्वद्ध्रुवासीद ध्रुवोवार्युंचांतरिक्षंचमोच भीए॒श्व० प्रजा० त० ततोयज्ञोप
वीतमादिसायदहरेवेत् उदुस्संजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसूर्यं चित्रंदेवानामुदगादनीकंचक्षुमि
त्रस्यवरुणस्याग्नेः आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च उद्वयंतमसस्परिज्योतिष्पश्यं
तउत्तरं देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं देवस्त्वेतित्रिस्ताडयेत् गायत्र्यादशवारमभिमंत्र्य ततःस्त्रिथादिसं
कीर्त्यश्रुति० थंयज्ञोपवीतधारणंकरिष्ये यज्ञोपवीतमितिमंत्रस्यपरब्रह्मपरमात्माऋषिए॒श्रोतस्मार्तकर्मानुष्ठान०

१२

63
1984

स्त्रिथर्थंयज्ञोपवीतधारणेविनियोगः ॐयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यं प्रति
मुंचशुभ्रंयज्ञोपवीतंबलमस्तेजः आचम्यप्रतियज्ञोपवीतंकृत्वा अथप्रकारांतरेणयज्ञोपवीतंसंस्कारः शु०र्थंश्रौ
तस्मार्त०र्थंयज्ञो०संस्कारंकरिष्ये गायत्र्यादशवारमार्जनं अभिमंत्र्य यज्ञोपवीतमितिधारयेत् ततःसभार्दीपं स्त्रि
थादिसंकीर्त्यश्रुति०र्थंममपत्न्यासहइहजन्मनिजन्मांतरेचसौभाग्यादिपुत्रपौत्राद्यभिवृध्यर्थंश्रीर्यशायुर्बलश्च
प्राप्तिकामः सभायामग्निसंनिधौश्रीमहाविष्णुप्रीत्यर्थंआचार्यायसभार्दीपदानंकरिष्ये तदंगगणपतिस्मरणंपू
जनंवाब्राह्मणपूजनंदीपपूजनंचकरिष्ये गणपतिपूजांकृत्वा ततोविप्रपूजांकृत्वा ततःदीपपूजनं शुभंकरोतिकर्त्तो
रामिति स्वस्त्ययनंकृत्वाहीर्घमा० विप्रहस्तेउदकंदत्त्वा श्रावणांश्रावणऋक्षेसभायामग्निसंनिधौ सभार्दीप प्रदानेन
प्रीयतांमेजनार्दन भोदीपब्रह्मरूपस्त्वंज्योतिषांप्रभुरव्ययं अवेधव्यंचसौभाग्यंदेहिमेग्रहजंसुखं अनेनसभार्दी
पप्रदानेनवस्त्रफलयथाशक्तोदक्षिणातांबूलेसहितेनश्रीमहाविष्णुस्वरूपिणेआचार्यायतुभ्यमहंसंप्रददे देवस्य
त्वासवि० प्रतिगृह्यतांप्रतिगृह्णामि इतिप्रतिवचनं अनेनसभार्दीपप्रदानेनश्रीमहाविष्णुःप्रीयतांनमम ततःग
च्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर यत्रब्रह्मादयोदेवास्तत्रगच्छकृताद्यानः इत्यग्निंविसृज्य इत्युपाकर्मः समाप्तः ॥
अथसंग्रहार्थंलिख्यते उत्सर्जनादौकायशुध्यर्थंपंचगव्यप्राशनंकृत्वा देशकालौनिर्दिश्यसर्वेषांकायशुध्यर्थंपं
चगव्यहोमंकरिष्ये स्वस्वर्थसारे गोमुत्रंगोमयंक्षीरंदधिसर्पिकुशोदकं निर्दिश्यंपंचगव्यस्यपवित्रेकायशोधने
गोमुत्रंतुफलंदद्यात्कलार्धंगोमयंस्मृतं अन्यमेकफलंदद्यात् दध्नस्त्रिफलमुच्यते क्षीरंसप्तफलंदद्यात्कलमेकंकु
शोदकं मंत्रपूतंततःकुर्यात्पवित्रीकरणंभवेत् सुवर्णादिताम्रपात्रेपंचगव्यंपूर्ववत्कृत्वा तेनैवोक्तहोतर्यचतु
र्थीशंसमंत्रकैः इरावतीधेनु० दधिक्राव्ण० इदंविष्णुर्वि० विष्णवइ० मानस्तोके०रुद्रायेदं० अग्नजुष्टेनि० अग्नएइ०त
त्सवि०सूर्यायेदं०अग्नयेस्वा०अग्नय०सोमायस्वा०सोमाये०ॐभूर्भुवःस्वःस्वा० प्रजापत० प्रणवेनालोड्य प्रणवेनाभि
मंत्र्य प्रणवेनपिबेत् अथकालविर्णयवचनानि अध्यायनमुपाकर्मश्रावण्यांश्रवणेनतु तन्मासेहस्तयुक्तायांपंच
म्यांवाद्दश्यते अश्लेषायस्मिन्मासेतुनभवंतिचेत् तस्मात्प्रपौसीमासीश्रवणेनकरोतितत् शाकलानांसमानीव
श्रुतोसाकृत्स्न्येवेत् वाष्कलानांतुतस्यांरिक्तायांसाकृत्स्न्येवेत् ७ ७ ७ ७ ७ ७

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥उत्सर्जनउपाकर्मसमाप्तः॥संख्या ८५७॥